# ॥ શ્રીપરશુરામાષ્ટકમ્ ૩ ॥

.. Shri Parasuramashtakam 3 ..

sanskritdocuments.org

August 20, 2017

# .. Shri Parasuramashtakam 3 ..

## ॥ શ્રીપરશુરામાષ્ટકમ્ ૩ ॥

## Sanskrit Document Information

Text title : parashurAmAShTakam 3

File name : parashurAmAShTakam3.itx

Category : aShTaka, vishhnu, dashAvatAra

Location : doc_vishhnu

Author : shrIpUsapATi raNganAyakAmAtya bhArgavarShi

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada, PSA Easwaran

Latest update : June 17, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીપરશુરામાષ્ટકમ્ ૩ ॥

॥ શ્રીમદ્દિવ્યપરશુરામાષ્ટકસ્તોત્રમ્ ॥

બ્રહ્મવિષ્ણુમહેશસન્નુતપાવનાઙ્ઘ્રિસરોરુહં
 નીલનીરજલોચનં હરિમાશ્રિતામરભૂરુહમ્ ।
કેશવં જગદીશ્વરં ત્રિગુણાત્મકં પરપૂરુષં
 પર્શુરામમુપાસ્મહે મમ કિઙ્કરિષ્યતિ યોઽપિ વૈ ॥ ૧॥

અક્ષયં કલુષાપહં નિરુપદ્રવં કરુણાનિધિં
 વેદરૂપમનામયં વિભુમચ્યુતં પરમેશ્વરમ્ ।
હર્ષદં જમદગ્નિપુત્રકમાર્યજુષ્ટપદામ્બુજં
 પર્શુરામમુપાસ્મહે મમ કિઙ્કરિષ્યતિ યોઽપિ વૈ ॥ ૨॥

રૈણુકેયમહીનસત્વકમવ્યયં સુજનાર્ચિતં
 વિક્રમાઢ્યમિનાબ્જનેત્રકમબ્જશાર્ઙ્ગગદાધરમ્ ।
છત્રિતાહિમશેષવિદ્યગમષ્ટમૂર્તિમનાશ્રયં - ??
 પર્શુરામમુપાસ્મહે મમ કિઙ્કરિષ્યતિ યોઽપિ વૈ ॥ ૩॥

બાહુજાન્વયવારણાઙ્કુશમર્વકણ્ઠમનુત્તમં
 સર્વભૂતદયાપરં શિવમબ્ધિશાયિનમૌર્વજમ્ ।
ભક્તશત્રુજનાર્દનં નિરયાર્દનં કુજનાર્દનં
 પર્શુરામમુપાસ્મહે મમ કિઙ્કરિષ્યતિ યોઽપિ વૈ ॥ ૪॥

જમ્ભયજ્ઞવિનાશકઞ્ચ ત્રિવિક્રમં દનુજાન્તકં
 નિર્વિકારમગોચરં નરસિંહરૂપમનર્દહમ્ ।
વેદભદ્રપદાનુસારિણમિન્દિરાધિપમિષ્ટદં
 પર્શુરામમુપાસ્મહે મમ કિઙ્કરિષ્યતિ યોઽપિ વૈ ॥ ૫॥

નિર્જરં ગરુડધ્વજં ધરણીશ્વરં પરમોદદં
 સર્વદેવમહર્ષિભૂસુરગીતરૂપમરૂપકમ્ ।
ભૂમતાપસવેષધારિણમદ્રિશઞ્ચ મહામહં
 પર્શુરામમુપાસ્મહે મમ કિઙ્કરિષ્યતિ યોઽપિ વૈ ॥ ૬॥

સામલોલમભદ્રનાશકમાદિમૂર્તિમિલાસુરં
 સર્વતોમુખમક્ષિકર્ષકમાર્યદુઃખહરઙ્કુલૌ ।

વેઙ્કટેશ્વરરૂપકં નિજભક્તપાલનદીક્ષિતં
પર્શુરામમુપાસ્મહે મમ કિઙ્કરિષ્યતિ યોઽપિ વૈ ॥ ૭॥

દિવ્યવિગ્રહધારિણં નિખિલાધિપં પરમં મહા-
વૈરિસૂદનપણ્ડિતં ગિરિજાતપૂજિતરૂપકમ્ ।
બાહુલેયકુગર્વહારકમાશ્રિતાવળિતારકં
પર્શુરામમુપાસ્મહે મમ કિઙ્કરિષ્યતિ યોઽપિ વૈ ॥ ૮॥

પર્શુરામાષ્ટકમિદં ત્રિસન્ધ્યં યઃ પઠેન્નરઃ
પર્શુરામકૃપાસારં સત્યં પ્રાપ્નોતિ સત્વરમ્ ॥

॥ ઇતિ શ્રીપૂસપાટિ રઙ્ગનાયકામાત્ય ભાર્ગવર્ષિકૃત
શ્રીમદ્દિવ્યપરશુરામાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Proofread by Malleswara Rao Yellapragada, PSA Easwaran

.. Shri Parasuramashtakam 3 ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*